(शोधलेखनाम – मानसिक-प्रदूषण-निवारण वैदिक चिन्तनम्) 389

Registration No. 1589/2008-09 ISSN. 2347-4491 Impact Factor 2.38[illegible]

# अयन्

## *An International Multidisciplinary Refereed Research Journal*

*Patron*

**Prof. I.S. Chouhan**

**(Ex V.C., Barkatullah University, Bhopal)**

*Editor in Chief*

**Dr. Bindu Bhushan Upadhyay**

*Executive Editor*

**Dr. Vikramaditya Rai**

*Editor*

**Dr. Vikash Kumar**

**Dr. Kumar Varun**

**Volume 7 No. 2 (April-June) Issue 2 UGC No. 49095 Year- 2019**

***Published by***

**Lok Manav Samaj Kalyan Sansthan**

**Aurangabad (Bihar)-824101**

*IN ASSOCIATION WITH*

**K.R. PUBLISHERS AND DISTRIBUTORS**

**Baba Shopping Complex, Lanka, Varanasi – 05**

- ❖ अर्वाचीनसंस्कृतकवितायां मानवमूल्यानि
  *डॉ. राजकुमारमिश्रः* 78-83
- ❖ लोक कला के तत्त्व एवं स्वरूप
  *गरिमा गुप्ता* 84-85
- ❖ मानसिक-प्रदूषण-निवारणे वैदिक चिन्तनम्
  डॉ. बृहस्पति मिश्रः 86-89
- ❖ মল্লিকা সেনগুপ্তের সাহিত্য : সামগ্রিক মূল্যায়ন
  শিবানী মন্ডল 90-97
- ❖ অভিজিৎ সেন -এর উপন্যাসে চরিত্রের অন্তর্বয়নঃ সমাজ – সাংস্কৃতিক প্রেক্ষাপটে
  জয়শ্রী মান্না 98-102
- ❖ वर्षा एवं शरद् ऋतु–वर्णन (श्रीमद्भागवत के परिप्रेक्ष्य में)
  *डॉ. मनोज कुमार* 103-107
- ❖ भाषाओं के अध्ययन में सूचना प्रौद्योगिकी का उपयोग
  *विजय कुमार* 108-110
- ❖ विद्यार्थियों के सांगीतिक विकास में पारिवारिकपरिवेश की भूमिका
  *डॉ० सुषमा शर्मा* 111-113
- ❖ **Role of young voters in Healthy Democracy**
  *Naveen Kumar Verma* 114-117
- ❖ सत्रहवीं शताब्दी के फ्रांसीसी साहित्य में शास्त्रीय नाटकों का विकास
  *डी.के. सिंह* 118-121
- ❖ जैन दर्शन में प्रतिपादित कर्मसिद्धान्त
  *डॉ. प्रतिमा सिंह* 122-125
- ❖ स्वातंत्र्योत्तर हिन्दी कहानी एवं परिवर्तित ग्रामीण संरचना
  *पीयूष राज* 126-130
- ❖ योग दर्शन में कैवल्य का स्वरूप
  *निखिल कुमार पाठक* 131-134
- ❖ **Changing Discourse of Local Governance**
  *Diwakar Kumar Jha* 135-140
- ❖ नरेन्द्र मोदी सरकार की विदेश नीति
  *शुभम राय* 141-143
- ❖ मीडिया एवं भारतीय समाज
  *महेश कुमार भारती* 144-146
- ❖ **Critical Evaluation of JP's Contribution in Political Reform in time of Emergency**
  *Dr. Rajeev Ranjan* 147-154
- ❖ सृजनात्मकता से अभिप्राय और कलात्मक क्षेत्र के बीच परस्पर–सम्बन्ध
  *विजय भगत* 155-160
- ❖ **Concept and Significance of Nabhi Chakra with Special Reference to Ayurveda, Yoga and Philosophy**
  *Manoj Kumar Singh Chauhan*
  *Dr. B.M.N Kumar* 161-166

# मानसिक-प्रदूषण-निवारणे वैदिकं चिन्तनम्

**डॉ. बृहस्पति मिश्रः**

**प्राध्यापकः, श्रीशक्ति संस्कृत महाविद्यालयः, श्री नयनादेवी जी, बिलासपुरम्, हि०प्र०**

जिजिर्विषा जिवितुम् इच्छा (उत्कटरूपेण) प्रकृतिप्रदत्तम् प्राणिमात्राय वरदानम् अस्ति । जिजिविषा प्राणिमात्रस्य अधिकार अस्ति तथा प्रकृतिः प्रत्येकं प्राणिनः जिजिविषां पूरयितुं अकूतम् अनन्तं च भाण्डागारं स्वक्रोडे स्थापयति, मनुष्य अपि अस्मिन् अपवादः न भवितुमर्हति । किन्तु जिजिविषा यदा लोभेन अहंकारेण च सार्धं मिलित्वा कार्यं करोति तदा सम्पूर्णापि प्रकृतिः केवलाय मानवाय अपि न्यूना जायते।

दार्शनिकेषु ग्रन्थेषु मानवस्य त्रिविधदुःखनाशाय[1] उल्लेखः अस्ति आधिदैविकम्, आधिभौतिकम्, आध्यात्मिकं चेति । एवमेव मानवस्य 'चतुःपक्षे आवृतम् आवरणं= पर्यावरणम्' अपि त्रिविधमेव भवति 1.आधिदैविकम् –'अग्निवाय्वादीनां प्राकृतिकशक्तीनां क्रियाकलापैः निर्मितम्[2] पर्यावरणम्', 2. आधिभौतिकम् – 'प्राणिनां भौतिकक्रियाकलापैः निर्मितम्[3] पर्यावरणम्' 3.आध्यात्मिकम् –'मनसः उत्पन्नम् अर्थात् मनुष्यस्य सूक्ष्मशरीरैः निर्मितम्[4] पर्यावरणम्' इति ।

यथा त्रिविधं दुःखं भवति (आचार्यसुश्रुतानुसारं पीडा त्रिविधा आधिदैविकं आधिभौतिकं, आध्यात्मिकं चेति)[5] तथैव दुःखविलोमरूपं सुखं अपि त्रिविधं भवति । वक्तुं शक्यते यत् त्रिविधस्य दुःखस्य अथवा त्रिविधस्य सुखस्य उत्पत्ति त्रिविधैः पर्यावरणैः एव भवति।[6] यदा समस्थित्यां प्राकृतिकं योगक्षेमं चलति तदैव स्वस्थं पर्यावरणम् इति भवति। यदा अन्तर्निर्मितैः स्वतर्नियामकैः क्रियाविधौ प्राकृतिकस्य योगक्षेमस्य ह्रासो भवति तदा तद् अस्वस्थं पर्यावरणं आधुनिकप्रयोगानुसारं 'प्रदूषणम्' इति शब्देन व्यवह्रियते।[7]

जैविक-संघटके मनुष्यः सर्वाधिकबुद्धिमान् अस्ति अत एव शक्तिशाली प्राणी अपि अस्ति। एषः शक्तिशाली प्राणी स्वलालसाभिभूतः बुद्धिकौशलैः वैज्ञानिकसंसाधनैः च प्रकृते स्वभाविकक्रियायां बाधाम् उत्पादयति । परिणामतः पर्यावरणस्य संघटकनाम् गुणवत्तायां ह्रासः प्रदूषणम्वा आरभ्यते । एष ह्रासः उत्तरोत्तरं वर्धमानः आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकं च पर्यावरणं ह्रासयतिप्रदूषणम् च वर्द्धयति ।

मनुष्यस्य स्वार्थपरतया स्वार्थप्रधानत्वाच्च स्वहानिं साक्षात् पश्यन्नपि अपश्यनिव उपेक्षां करोति । किन्तु यदा स्वकीयाम् अत्यधिकस्तरेण जातां हानिम् स्वस्थूल-चक्षुषा साक्षात्करोति तदा अवगच्छति एतत् प्रदूषणं तु मम आश्रयस्थलं, आश्रयवस्तु, आश्रितजीवं, शरीरं, मनः, बुद्धि सर्वं अपि नष्टं करोति । पुनः निदया जाग्रतः इव अर्ध-उन्मिलितचक्षुष्कः हठात् कारणानाम् अन्वेषणं करोति ।

तदा च स्थूल-अन्वेषणैः वैज्ञानिकयन्त्रैः एतत् ज्ञानं प्राप्नोति यत् भौतिकपदार्थेषु उन्मत्तवत् आसक्तः स्थूलबुद्धिःआधुनिकमानवः यदा अत्यधिकभोगपदार्थानाम् उपभोगं करोति तदेव कारणम् अर्थात् सर्वेषां प्रदूषणानां ह्रासानां कारणं स्थूलरूपेण स्वकार्याणि एव सन्ति" इति निश्चिनोति । एतदेव निश्चयं कृत्वा तस्य उपभोगस्य अवरोधं कर्तुं यतते।

किन्तु एतस्य प्रदूषणरूपिणः विषवृक्षस्य मूलं द्रष्टुं न प्रयतते। तद् अज्ञानात् विषवृक्षस्य मूलं नष्टं न कर्तुं शक्नोति। यदा पर्यन्तं विषवृक्षस्य मूलं नष्टं न भवति तदा पर्यन्तं नाशिताः शाखाः, प्रशाखाः, नाशितानि पुष्पाणि, पत्राणि पुनः प्ररोहन्ति कदाचित् अधिकस्तरेण अपि प्ररोहन्ति।[8]

तत्त्वज्ञानिनां रहस्यान्वेषि-प्रज्ञावताम् ऋषीणां जीवनं चिन्तनञ्च प्राणभूतं मन्यमानाः भारतीयसंस्कृत्याः अनुरागिणः अभिमानिनः यदा ऋषिभिः अहेतुकचेष्टया प्रदत्तं वैदिकं वाङ्मयं परिशीलितवन्तः तदा तैः ज्ञातम् अभवत् यत् दूषितं मन एव अस्य विषवृक्षस्य मूलम्। यथा निर्दिष्टम् अमृतबिन्दूपनिषदि "मनः एव मनुष्याणां कारणं मोक्षबन्धनयोः"[9] अर्थात् मनुष्यस्य दुःखरूपी बन्धनस्य कारणं मन एव अस्ति ।

ऋषीणां चिन्तनं सारगर्भितं भवति। अत एव अस्यां एव पङ्क्तौ निवारणं समाधानं अपि ज्ञापितम् । यत् मन एव दुःखात् मुक्तेः मोक्षस्य च कारणम् अस्ति ।